| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| व्रतभङ्गः। | लोभान्मोहात् प्रमादाद्वा व्रतभङ्गे उपवासत्रयं केशमुण्डनञ्च। | | १॥० कार्षापणाः। | यथाशक्ति। |
| उष्ट्रारासभयानम्। | कामतः सकृदारोहणे नग्नस्नाने च प्राणायामः। | | | |
| | अभ्यासे त्रिरात्रोपवासः। | | १॥० कार्षापणाः। | यथाशक्ति। |
| | अव्यवधानेनारोहणे नग्नस्य ईषदभ्यस्तस्नानभोजने च प्राणायामशतम्। अत्र उपपातकगणपठितेषु यत्र प्रायश्चित्तं नोक्तं तत्रोपपातकसामान्यप्रायश्चित्तमेव ग्राह्यम्। तत्तु मनूक्तं त्रैमासिकं गोव्रतं चान्द्रायणं वा। याज्ञवल्क्योक्तं मासं पयःपानं पराको वा। एतान्येव प्रायश्चित्तानि पापस्य गुरुलाघवमवगम्य व्यवस्थेयानि ॥ * ॥ | | | |
| **अथ जातिभ्रंशकरपापानि।** | **प्रायश्चित्तानि।** | **तदशक्तौ धेनुदानम्।** | **तदशक्तौ चूर्णीदानम्।** | **दक्षिणा।** |
| ब्राह्मणपीडाकरणम्। लशुनादिमद्ययोर्घ्राणम्। मित्रे कौटिल्यम्। पुंसि मैथुनञ्च। | कामतः सान्तपनम्। | २ धेनू। | ६ कार्षापणाः। | यथाशक्ति। |
| | अकामतः प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | एतच्चाभ्यासे। | | | |
| | अत्रायं विशेषः। | | | |
| | ब्राह्मणावगोरणे प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | ब्राह्मणे दण्डादिनिपातने अतिकृच्छ्रम्। | ३ धेनवः। | ९ कार्षापणाः। | यथाशक्ति। |
| | ब्राह्मणस्य शोणितोत्पादने कृच्छ्रातिकृच्छ्रम्। | ५ धेनवः। | १५ कार्षापणाः। | यथाशक्ति। |
| | ब्राह्मणाङ्गच्छेदने कृच्छ्रातिकृच्छ्रम्। | ५ धेनवः। | १५ कार्षापणाः। | यथाशक्ति। |
| | चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | दशगोदानञ्च। | | | |
| **अथ सङ्करीकरणपापानि।** | **प्रायश्चित्तानि।** | **तदशक्तौ धेनुदानम्।** | **तदशक्तौ चूर्णीदानम्।** | **दक्षिणा।** |
| खराश्वोष्ट्रमृगहस्तिच्छागमेषमीनाहिमहिषाणां वधरूपाणि। | सकृत्करणे मासं यावकपानम्। | २ धेनू। | ६ कार्षापणाः। | यथाशक्ति। |
| | अभ्यासे कृच्छ्रातिकृच्छ्रम्। | ५ धेनवः। | १५ कार्षापणाः। | यथाशक्ति। |
| | अत्यन्ताभ्यासे चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| **अथापात्रीकरणपापानि।** | **प्रायश्चित्तानि।** | **तदशक्तौ धेनुदानम्।** | **तदशक्तौ चूर्णीदानम्।** | **दक्षिणा।** |
| निन्दितेभ्यो धनादानम्। वाणिज्यम्। शूद्रसेवनम्। असत्यभाषणञ्च। | सकृत्करणे चतुरहसाध्यं तप्तकृच्छ्रं शीतकृच्छ्रं वा। | सपादधेन्वसम्भवात् २ धेनू। | ३॥०कार्षापणाः। | यथाशक्ति। |
| | अभ्यासे महासान्तपनम्। | ६ धेनवः। | १८ कार्षापणाः। | यथाशक्ति। |
| | अत्यन्ताभ्यासे चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |